# मम उद्यानम्

## आमुखम्

सर्वेऽपि मानवाः पुष्पाणि इच्छन्ति। कुसुमानां सुगन्धं को वा न इच्छति? पुष्पाणां वर्णाः कस्य वा मनः न आकर्षन्ति? पुष्पलतादीनां आकरः भवति उद्यानम्। अस्माकं ग्रामेषु दृश्यमानानां पुष्पाणां परिचायनाय, प्रकृतिस्नेहसंवर्धनाय, 'म, ल' इति अक्षरद्वयस्य परिचायनाय च गद्यपाठोऽयम् अत्र योजितः।

उद्यानानि सर्वेषाम् आह्लाददायकानि भवन्ति। सस्यानां रोपणाय, पालनाय, पोषणाय च प्रेरणादायकानि भवन्तु अयं पाठः। अक्षरस्यान्तः वर्णलेपने Jimp इति तन्त्रांशमुपयुज्य मार्गदर्शनं कर्तुं शक्यते चेत् उत्तमम्। साक्षात् अक्षरलेखनमत्र न उद्दिष्टम्।

पाठनाम - मम उद्यानम्

कालांशः - १४

उद्देश्यम् - प्रकृतिस्नेहः वर्धनीयः।

नैपुणी - पुष्पाणां संस्कृनामधेयं परिचिनोति।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| गद्यपाठः<br>पदानि व्यवहाररूपम्<br>अक्षरम् म, ल<br>आशयः-<br>प्रकृतिः मनोहरी<br>पुष्पैः प्रकृतिसौन्दर्यं वर्धते। | चित्रे वर्णलेपनम्<br>गीतालापनम् - सामूहिकम्<br>पुष्पग्रहणम्- क्रीड़ा<br>अक्षरे वर्णेन लेपनम्<br>अक्षरसमूहात् म, ल इति<br>अक्षरप्रत्यभिज्ञानम्<br>जिम्प् तन्त्रांशस्य उपयोगः। | सकौतुकं वर्णलेपनम्।<br>गीतालपने तत्पर्यं प्रदर्शयन्ति।<br>पुष्पनामानि जानन्ति।<br>सहवर्तित्वं अभ्यस्यते।<br>अक्षरं प्रत्यभिजानन्ति।<br>चित्ररचनायां, वर्णलेपने<br>च तात्पर्यं प्रकटयन्ति।<br>अक्षरसमूहात् म,ल<br>इत्यक्षरे प्रत्यभिजानन्ति |

**प्रवर्तनम् १**

**वाचनम्**

**उद्देश्यम्-** पुष्पनामपरिचयः।

अध्यापिका पाठभागं प्रदर्श्य उच्चैः स्पष्टतया च पठति। एवं द्वित्रवारं पठनानन्तरं छात्रान् अनुकथनाय प्रेरयति।

**मूल्यनिर्णयसूचिकाः -**

सुस्पष्टवाचनम्।

**प्रवर्तनम् २**

**चित्रे वर्णलेपनम्**

**उद्देश्यम्-** वर्णलेपनद्वारा पुष्पाणां नामज्ञानम्।

अध्यापिका पाठपुस्तके विद्यमानानां पुष्पाणां रेखाचित्राणि छात्राणां संख्यानुसारं पूर्वमेव सज्जीकरोतु। अनन्तरं वदति - 'छात्राः, सर्वे चित्राणि इच्छन्ति खलु। अहम् इदानीं कानिचन चित्राणि ददामि। भवन्तः युक्तेन वर्णेन लिम्पन्तु इत्युक्त्वा चित्राणि एकैकस्मै छात्राय ददातु। छात्राः रेखाचित्राणि उचितेन वर्णेन लिम्पन्तु। वर्णलेपनानन्तरम् अध्यापिकया निर्दिष्टः छात्रः पुरतः आगत्य स्वहस्ते विद्यमानं चित्रं प्रदर्श्य तस्य पुष्पस्य नाम मातृभाषया वदतु। सम्यगुक्तवन्तम् तम् अभिनन्दतु। पुनः तस्य पुष्पस्य संस्कृतनाम अध्यापिका छात्रान् परिचाययतु। छात्राः तन्नाम उच्चैः वदन्तु। एवं सर्वेषां चित्राणां प्रदर्शनाय कक्ष्यायाम् अवसरः कल्पनीयः। एतया रीत्या पाठ्यपुस्तके विद्यमानानां सर्वेषां पुष्पाणां नामानि श्रोतुं वक्तुं च छात्राः अवसरं लभेरन्।

**मूल्यनिर्णयसूचिकाः -**

उचितः वर्णप्रयोगः।

लेपननैपुणी।

**प्रवर्तनम् - ३ पुष्पं गृह्णीमः।**



छात्रान् गणद्वयं करोतु। प्रथमगणस्य छात्राणां कृते भिन्न-भिन्नपुष्पाणां नामानि उच्चैः उक्त्वा ददातु। पुनः द्वितीयगणात् द्वौ छात्रौ क्रीडाङ्कणे अभिमुखं स्थित्वा परस्परं अङ्गुलीभिः बन्धनं कृत्वा गोपुरद्वारं निर्माय तिष्ठेताम्। गोपुरद्वारः छात्राणां सञ्चाराय पर्याप्तः स्यात्। प्रथमगणीयाः गोपुरकवाटस्य समीपे तिष्ठन्तु। द्वितीयगणस्य शिष्टाः छात्राः अधो दत्तं गीतं निरन्तरम् आलपन्तु। गीतालपने अध्यापिका अपि भागं स्वीकरोतु।

**क्रीडागीतम्**

उद्यानमध्ये
पाटलमस्ति।
सोवन्तिका अस्ति।
मल्लिका भवति।
कमलं च भवति।
जपासुममस्ति।
पश्यतु, बालिका।
सेवन्तिकां कर्षति।
स्वीकृत्य धावति।
उत्तिष्ठतु रक्षक
सेवन्तिकां बालिकां
शीघ्रं गृह्णातु।



क्रीडागीतमिदं क्रीडायाः पूर्वस्मिन् दिने बहुवारं कक्ष्यायाम् आलपनं कुर्वन्तु।

यदा गीतालपनम् आरभते तदा प्रथमगणीयाः गोपुरद्वारेण निरन्तरं धावन्तु। यदा 'सेवान्तिकां बालिकां शीघ्रं गृह्णातु' इति आलपन्ति, तदा कवाटरूपेण स्थितौ छात्रौ सेवन्तिकां बालिकां प्रतिपाल्य गृह्णीताम्। समीचीना बालिका गृहीता चेत् सा बहिः गच्छतु। सर्वेऽपि करताडनं कुर्वन्तु। असमीचीना गृहीता चेत्, गीतम्, क्रीडाम् च अनुवर्तताम्। क्रीडार्थं पाठ्यपुस्तके दत्तानां पुष्पाणां नामानि पर्याप्तानि। एतया रीत्या द्वितीयगणस्यापि अवसरः देयः।

**मूल्यनिर्णयसूचिकाः -**

पुष्पनामानाम् अवगमनम्।

सहभागित्वम्।

**प्रवर्तनम् ३**

**गीतालपनम्।**

**उद्देश्यम्-** संस्कृतगानालपनाय अवसरः।

पुष्पाणां नामानि श्लोकद्वयरूपेण अधो दत्तमस्ति। छात्राणाम् औत्सुक्यमनुसृत्य पाठयतु। अध्यापिका गीतम् उच्चैः आलपतु छात्राः अनुगायन्तु।

कमलम् मल्लिका जातिः
चम्पकम् कुमुदं तथा।
सेवन्तिका जपापुष्पम्
सूर्यकान्तिः च केतकी।।
शङ्खपुष्पं द्रोणपुष्पम्
अशोकं पाटलं तथा।
कर्णिकारः पारिजातम्
तुलसी नवमालिका।।

**मूल्यनिर्णयसूचिकाः -**

सतालम् आलपनम्।
सङ्घे भागभागित्वम्।

**प्रवर्तनम् ४**

**नामयोजनम्**

**उद्देश्यम् -** पुष्पाणां नामप्रत्यभिज्ञानम्।

अध्यापिका कमलम्, सेवन्तिका, जपाकुसुमम्, पाटलम् इति पुष्पाणि तेषां नामानि च स्थानपरिवर्तनं कृत्वा विलिख्य एकं चार्ट्पत्रं सज्जीकरोतु। तं चार्ट्पत्रं प्रदर्श्य पुष्पैः सह पुष्पनाम्ना रेखाभिः योजनाय निर्दिशतु। छात्राः पाठपुस्तके विद्यमानैः पुष्पैः सह तेषां नामानि रेखाभिः योजयन्तु; पुष्पनामानि वदन्तु।

**मूल्यनिर्णयसूचिकाः -**

उचितं योजनम्।
स्पष्टोच्चारणम्।

**प्रवर्तनम् ५**

**अक्षरयोः(म,ल) वर्णलेपनम्**

**उद्देश्यम्-** अक्षरप्रत्यभिज्ञानम्।

अध्यापकः कमलम् इति, पुस्तके बृहदक्षरैः लिखिते पदे विद्यमानस्य मकारस्य वर्णयोजनाय निर्दिशति। छात्राः सर्वे मकारे वर्णं योजयन्ति। पुनः Jimp इति तन्त्रांशम् उपयुज्य निर्मितस्य लकारस्य लेखनविधिं परिचाययति अध्यापिका। ततः छात्राः लकारं वर्णेन लिम्पन्तु। पूरणानन्तरं छात्राः अभिनन्दनीयाः। कमलम् इति पदम् च त्रिचतुर्वारं उच्चारयन्तु।

**मूल्यनिर्णयसूचिकाः -**

वर्णलेपननैपुणी।

स्पष्टोच्चारणम्।

**प्रवर्तनम् - ६**

**चित्रे वर्णलेपनम्**

**उद्देश्यम्-** कलापठनाय अवसरः।

छात्राः किमपि एकं पुष्पम् अङ्कन्या रचयन्तु। तदनन्तरम् उचितं वर्णं च योजयन्तु।

**मूल्यनिर्णयसूचिकाः -**

पुष्पचित्ररचना।

उचितवर्णलेपनम्।

**प्रवर्तनम् ७ -**

**अक्षरेभ्यः म, ल इत्यक्षरयोः प्रत्यभिज्ञानम्।**

**उद्देश्यम्-** वर्गीकरणज्ञानम्।

अध्यापिक लघुकागदेषु विविधाक्षराणि (एकस्मिन् कागदे एकमक्षरम्) लिखित्वा छात्राणां कृते वितरति। अनन्तरं तेभ्यः अक्षरेभ्यः मकारस्य पृथक् करणाय निर्दिशति। यः सम्यक् कर्तुं न प्रभवति तस्मै पुनः अक्षराणि न्यूनीकृत्य अवसराः दातव्याः।

**मूल्यनिर्णयसूचिकाः -**

अक्षरप्रत्यभिज्ञानम्।

**अनुबन्धप्रवर्तनानि-**

(क) विविधवर्णयुक्तानां पुष्पाणां चित्राणि समाहृत्य एकं चित्रपुस्तकं निर्मातु।

(ख) अक्षरचित्ररचना- ल- इत्यक्षरेण पिपीलिकायाः चित्रं रचयतु। **(अनुबन्धः -३)**